International Journal of Sanskrit Research 2020; 6(3): 10-12

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(3): 10-12
© 2020 IJSR
www.anantaajournal.com
Received: 08-03-2020
Accepted: 10-04-2020

**भगवानी निशाद**
षा.दू.श्री रा.म.वै. स्नातकोत्तर संस्कृत महाविद्यालयः रायुपरम् छत्तीसगढ़, भारत

**Corresponding Author:**
**भगवानी निशाद**
षा.दू.श्री रा.म.वै. स्नातकोत्तर संस्कृत महाविद्यालयः रायुपरम् छत्तीसगढ़, भारत

# पुराणेशु राश्ट्रचिन्तनम्

**भगवानी निशाद**

पुराणानि अनादिकालादेव मानवानाम् आदर्षरूपाणि सन्ति। एतैर्न केवलं पुरातन्या भारतीय सभ्यतासंस्कृतेष्च दर्षनं भवति अपितु नूतनजीवनदर्षनस्य मार्गोऽपि सिद्धः भवति। एतेशु वेदोपनिशदारण्यकानां ब्राम्हणग्रन्थानां च तत्वं विद्यमानमस्ति। पुराणानि मानवानां मार्गदर्षकानि, भारतीयानां गौरवस्य साक्षीणि भारतीयेतिहासस्य द्योतकानि च सन्ति। भक्तिज्ञानवैराग्यरूपिण्यः पवित्रतमाः पुण्यसलिला अत्रैव प्रवाहमानाः सन्ति।

पुराणेशु राश्ट्रचिन्तनस्य समीक्षायाः पूर्ण 'राश्ट्र' षब्दस्य वैयाकरणदृश्ट्या व्यत्पत्तिसमीक्षणं च आवष्यकम्। 'राश्ट्र' षब्दस्य निश्पत्तिर्दिप्त्यार्थकराजधातोः औणादिकश्ट्रन् प्रत्ययात् जायते।[1] विविधषब्दकोशेशु राश्ट्रषब्दस्य अनेकेअर्थाः 'जनपदः' इति।[2] 'षब्दकल्पद्रुमे' राश्ट्रषब्दस्य अर्थः 'विशयः' इति वर्तते।[3] वाचस्पत्यं षब्दकल्पद्रुमष्चानयोः द्वयोरेव राश्ट्रषब्दस्य भावार्थः एकेन इदृषेन भूभागविषेशेण वर्तते यत्र सर्वे जनाः एक विषिश्ट–पद्धत्याः षासनस्य अधीनस्थाः सन्ति।[4] आङ्लभाशायां राश्ट्रियतायाः बोधकः श्छंजपवदश षब्दोऽस्तियत् लेटिन भाशायाः श्छंजनेश षब्दात् विकसितः। राजनीतिषास्त्रानुसारेण राश्ट्रषब्दस्य अर्थः जन्मना, जात्या, प्रजात्या च दृश्ट्या परस्परैकतायाः सुदृढभावनायुतं मानवपुञ्जम् अस्ति।

आचार्यकिषोरीदास– वाजपेयीमहाभागानुसारेण 'संस्कृतिरेव कामपि जातिम् अपरायाः जात्याः पृथक् करोति। संस्कृतिः राश्ट्रनिर्मात्री अस्ति। सुसंस्कृतं सुषासितं देषं राश्ट्रं कथयन्ति। एकदेषस्य एकराश्ट्रस्य वा जनता एकाजातिः अस्ति। तस्या जात्याः यत् स्वरूपम् अस्ति सा एव राश्ट्रियता कथ्यते। राश्ट्रम् एकम् अमूर्तं समश्टिरूपमस्ति। प्रत्येकं सुसंस्कृतजनस्य स्वराश्ट्रं प्रति सम्मानस्य स्नेहस्य च भावना भवति इयमेव राश्ट्रियता कथ्यते' इति।[5]

पुराणेशु भारतवर्शस्य विस्तृतं वर्णनं प्राप्तं भवति। भारतभूविशये ब्रह्मपुराणे लिखितमस्ति यत् अत्रत्याः भारतवासिनः भाग्यषालिनः स्वस्थाः तपस्विनः, दानषीलाः, याज्ञिकाः, वैश्णवाः, सदाचारिणः च सन्ति। कर्मभूमिरियं भारतभूमिः। ब्रह्मपुराणे जम्बूद्वीपवर्णने पुराणकारः व्यासवर्यः लिखिति–

उत्तरं यत्समुद्रस्य, हिमाद्रेष्चैव दक्षिणम्।
वर्शं तद् भारतं नाम, भारती यत्र सन्ततिः।।[6]

एवमेव भारतस्य सीमायाः विशये पुराणकारः निगदति यत् भारतस्य दक्षिणभागे समुद्रः, उत्तरस्यां दिषि हिमालयः, पूर्वस्तात् पष्चिमपर्यन्तं धनुशः प्रत्यञ्चायाः सममेव विद्यमानोऽस्ति। लिखितमस्ति यत्–

एवं तु भारतं वर्शं नवसंस्थानसंस्थितम्।
दक्षिणे परतो यस्य पूर्वे चैव महोदधिः।।
हिमवानुत्तरेणास्य कार्मुकस्य यथा गुणः।
तदेतद्भारतं वर्शं सर्वबीजं द्विजोत्तमः।।[7]

पद्मपुराणेऽपि भारतवर्शस्य वर्णनं ब्रह्मपुराणसदृषं विहितमस्ति। पुराणे अस्मिन् भारतवर्शस्य वर्णने षब्दावली किंचित् भिन्ना वर्तते। अत्र लिखितमस्ति यत् देषोऽयं मनु–पृथु–इक्ष्वाकु–ययात्यम्बरीषनहुषादीनां राज्ञां प्रियः आसीत्।[8] एवमेव विश्णुपुराणेऽपि भारतवर्शस्यभौगोलिकसीमायाः वर्णनं प्राप्यते। लिखितमस्ति यत्–

उत्तरं यत् समुद्रस्य हिमाद्रेष्चैव दक्षिणम्।
वर्शं तद्भारतं नाम भारती यत्र संततिः।।

नवयोजनसाहस्रो विस्तारोऽस्य महामुनेः।
कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम्।।[9]

एवमेव षिवमहापुराणेऽपि एतादृषमेव विवेचनम् उपलभ्यते।[10] श्रीमद् भागवते अपि भारतवर्शस्य महिमा कथितोऽस्ति। पुराणकारः वदति यत् ये प्राणिनः भारतवर्शे मुकुन्दसेवौपयिकं जन्म लब्धवन्तः ते किं षोभनं कृत्यं कृतवन्तः। वस्तुतः एतादृषस्य सौभाग्यस्य कृते स्वयं देवाः अपि लालायिताः भवन्ति। यथाहि–

अहो अमीशां किमकारिषोभनं।
प्रसन्न एशां स्विदुत स्वयं हरिः।
यैर्जन्मलब्धं नृशु भारताजिरे।
मुकुन्दसेवौपयिकं स्पृहा हि नः।।[11]

एवमेव श्रीमद्भागवते पञ्चमस्कन्धे व्यासवर्यः लिखति यत्– 'भारतेऽपि वर्शे भगवन्नरनारायणाख्यम् आकल्पान्तम् उपचितधर्मज्ञानवैराग्यैष्वर्योपषमो परमात्मोपलम्भनम् अनुग्रहायात्मवताम् अनुकम्पया तपोव्यक्तगतिष्चरति[12] इति।
वैदिकालादेव राश्ट्रस्य रक्षायै, राश्ट्रस्य कल्याणाय, राश्ट्रस्य उत्कर्शाय, राश्ट्रस्य मङ्गलाय, अस्माकम् ऋशिभिः अनेके मन्त्राः उद्गीरिता–
'वयं राश्ट्रे जागृयाम पुरोहिताः'[13] 'अहं राश्ट्री सङ्गमनी वसूनां चिकितुशी'[14] 'राष्ट्रमेका रक्षन्ति देवयूनाम्'[15] तेनेम ब्रह्मणस्पते परिराश्ट्राय धत्तनं'[16] आराश्ट्रे राजन्यः षूरइशव्योऽति व्याधी महारथो जायताम्'[17] जनभृतस्थ राश्ट्रदा राश्ट्रं मे दत्त स्वाहा अपां पतिरसि राश्ट्रदा राश्ट्रं मे देहि स्वाहा'[18] एवम्प्रकारेण राश्ट्रकविना पद्मश्री डॉ. कपिलदेवद्विवेदिना निबन्धषतके राश्ट्रचिन्तने लिखितं यत् यस्य मानवस्य जीवने हृदये वा राश्ट्रस्य उन्नत्यै, मातृभूमेर्हितचिन्तनाय, राश्ट्ररक्षायै, बलिदानभावः समर्पणभावष्च न भवति, तस्य मानवस्य जीवनं ष्मषानतुल्यं मन्यते।

न यत्र देषोद्धृतिकामनाऽस्ते, न मातृभूमेहितचिन्तनं च।
न राश्ट्ररक्षा बलिदानभावः ष्मषानतुल्यं नरजीवनं यत् ।।19

राश्ट्रस्य स्वरूपं विविधं भवति – निकृश्टं राश्ट्रं, मध्यमं राश्ट्रं, उत्तमं राश्ट्रञ्च। यस्मिन् राश्ट्रे केवलं भौतिकतायाः विकासः, ऋणं कृत्वा घृतं पिबेत् भस्मीभूतस्य देहस्य पुनरागमनं कुतः? इति सिद्धान्तस्य आचरणं भवति तद् राश्ट्रं निकृश्टमुच्यते। यस्मिन् राश्ट्रे जनता भौतिक विकासेन सह आत्मविकासं चिन्तयति किंतु तत्र परार्थं न चिन्तयति, तद् राश्ट्रं मध्यमं वक्तुं षक्यते। यस्मिन् राश्ट्रे मानवतायाः विकासः, जीवनमूल्यानां संवर्धनं, धर्मनीतिः राजनीतिः, अहिंसा परमोधर्मः, यत्र विष्वं भवत्येकनीडम्, कृण्वन्तोविष्वमार्यम्, सर्वे भवन्तु सुखिनः, मा भ्राता भ्रातरं द्विक्षन् चेत्यादिनाम् आध्यात्मिक–सांस्कृतिक–सामाजिक–राश्ट्रियगुणानां प्रभावः दृष्यते तद् राश्ट्रं श्रेश्ठं, उत्तमं, कल्याणकरं च वक्तुं षक्यते। वस्तुतः यस्मिन् राश्ट्रे मानवीयगुणानां आचरणं परस्परं रक्षणं च भवति, तस्मिन्नेव राश्ट्रे संस्कृतिः सुदृढ़ा भवति। यत्र संस्कृतेः समुन्नतिर्जायते तत्रैव मानवस्य उन्नतिः सन्निहिता भवति। यस्य उन्नतिर्भवति तस्य जन्म सफलत्वमाप्नोति।
अथर्ववेदस्य पृथिवीसूक्ते ऋशिः कथयति – 'माता भूमिः पुत्रोऽहं पृथिव्याः'[20] ऋशिः भूमिं प्रत्यत्यन्तं मातृत्वभावं प्रकटयन् स्वस्य वात्सल्यं प्रदर्षयति। यथा माता दुग्धाभिः षिषुं तोशयति तथैव भूमिमाता अपि अस्मान् अन्नादिभिः रत्नादिभिः पोशयति, पालयति, सन्तुश्टां च करोति, यतोहि भूमिमातुः कृते पुत्रोऽहं इति वचनं कथनेनैव माता स्वयं वात्सल्यं प्रकटयति।

## विविधेशु पुराणेशु भारतवर्शस्य प्रषस्तिः

पुराणानुषीलनेन प्रतीयते यत् अस्माकं पूर्वजानां स्वराश्ट्रं प्रति अगाधं प्रेमासीत्। पुराणानुसारं ऐहिकपारलौकिक– औद्योगिकार्थिक– सांस्कृतिक– राजनैतिकक्षेत्रेशु भारतवर्शं सर्वोत्कृश्टमासीत्। सत्कर्मद्वारा सर्वोत्तमलोक प्राप्तिकर्ता मानवः न केवलं स्वर्गलोकभोगासक्तेभ्यः उत्कृश्टोऽभिमतः अपितु भारतं कर्मभूमिमुक्त्वा अस्य महन्महत्वं गीतमस्ति। भारतवर्शे जन्मग्रहणार्थं देवता अपि लालायितः भवन्ति। मार्कण्डेय पुराणे उक्तमस्ति यत् देवताः सर्वदा कृतसंकल्पाः भवन्ति यद् वयं कदा भोगान् समाप्य पृथिव्यां जन्म ग्रहीश्यामः –

देवानामपि विप्रर्शे सदा एश मनोरथः।
अपि मानुश्यमाप्स्यामो देवत्वात् प्रच्युताः क्षितौ।
मनुश्यः कुरूते यन्तु तन्न षक्यं सुरासुरः।।[21]

श्रीमद्भागवते कर्मभूमेः भारतस्य भूरि भूरि प्रषंसा वर्तते। सनत्कुमारस्य मतमस्ति यत्ते मनुश्याः धन्याः सन्ति ये भारतभूमौ जन्मालभन्त। ते सुखपूर्वकं स्वेशु कल्याणकारीकर्मशु प्रवृताः सन्ति, स्वर्गं मोक्षं च लभन्ते। षिवपुराणे यथा –

आप्स्यन्ति धन्याः खलु ते मनुश्याः सुखैर्युताः कर्मणि सन्निविश्टाः।
जनुर्हि येशां खलु भारतेऽस्ति ते स्वर्ग मोक्षोभयलाभवन्तः।।22

**ब्रह्मपुराणेऽपि कर्मभूमिभारतस्य प्रषंसायाम् अनेकानि सूक्तिवाक्यानि लभन्ते। यथा –**

1. धन्याः खलु ते मनुश्याः ये भारते नेन्द्रियविप्रहीनता।[23]
2. पृथिव्यां भारतं वर्शं कर्मभूमिरूदाहृता।[24]
3. तदेतद् भारतं वर्शं सर्वबीजं द्विजोत्तमाः।[25]
4. धन्यास्ते भारतेवर्शे जायन्ते ये नरोत्तमाः।[26]
5. कः षक्नोति गुणान् वक्तुं भारतस्याखिलान् द्विजाः?[27]
6. भारतं वर्शमुत्तमम्।[28]

पुण्यभूमि भारते जन्म गृहीत्वा यः मनुश्यः सत्कार्यात् विमुखः भवति सः अमृतकलषं त्यक्त्वा विशभाण्डं चिनोति। यथा बृहन्नारदीयपुराणे कथितम् –

सम्प्राप्य भारते जन्म सुकर्मसु पराङ्मुखः।
पीयूशकलषं त्यक्त्वा विशभाण्डं च मार्गति।।[29]

## राश्ट्रस्वतन्त्रतायाः महत्वम्

पुराणेशु स्वतन्त्रतायाः महत्त्वं प्रतिपादितम्। यः स्वतंत्रतायाः आस्वादं जानाति सः अन्येभ्यः स्वतन्त्रतायाः विनयं करोति–

स्वतन्त्रष्च स्वतन्त्रेण स्वतन्त्रत्वमाप्यते[30]

स्वतन्त्रे समृद्धे च राश्ट्रे प्रत्येकं मनुश्यस्य स्वतंत्रतापूर्वकं जीवनयापयितुम् अधिकारोऽस्ति। पराधीनवृत्तिमनुश्यस्य अनेकविधं षोशणं भवति। मार्कण्डेयपुराणेऽपि स्वतंत्रतायाः विशये कथितम्–
'नरोऽपि परतन्त्रो यः तस्य कीदृङ् मनुश्यता'[31]
जीवनस्य सफलताः स्वतंत्रतायां निहिताः सन्ति 'पराधीन सपनेहु सुख नाहीं' इदृषाः समानविचाराः मार्कण्डेयपुराणेऽपि दृष्यते–

'स्वाधीनवृत्ते साफल्यं न पराधीनवृत्तिता'32

## राश्ट्ररक्षार्थं राज्ञः आवष्यकता

राश्ट्रस्य रक्षार्थं प्रजावत्सलः राजा आवष्यकः। यदि राश्ट्रे राजा बलहीनः स्वार्थी च वर्तते तदा राश्ट्रम् अराजकं भवति। अराजके राश्ट्रे मनुश्यस्य जीवनयापनं दुस्सहं भवति। स्वप्रजानां रक्षणं, परिपालनं, राज्ञः महत्वपूर्णं दायित्वमस्ति। अग्निपुराणकारः कथयति–

'राश्ट्रपीडाकरोराजा नरके वसते चिरम्'[33]

**श्रेश्ठः** राजा संरक्षितराश्ट्रस्य सर्वतोमुखी विकासं करोति। राजा धर्मानुसारेण प्रजापालनं कृत्वा समाजव्यवस्थानां सम्यक् संचालनम् करोति। प्रजानाम् अनुरागेण राश्ट्रस्य राजलक्ष्मीवृद्धिं प्राप्नोति। यथा–

'जनानुरागप्रभवा राज्ञो राज्यमहीश्रियः'[34]

सर्वेशु पुराणेशु यत्र–तत्र राश्ट्रवर्धनाय प्रार्थनाः वर्तन्ते। सर्वासां प्रजानां कल्याणं भरणपोशणं च राज्ञः दायित्वमासीत्। सम्पूर्ण राश्ट्रं सुघटितं भवेत्। राश्ट्रस्य सर्वविधं कल्याणं भवेत्, राश्ट्रे षं भवेत्, राश्ट्रस्य विभाजनं न भवतु' एतान् भावान् परिपोशयन्ती अनेकानि सूक्तिवाक्यानि पुराणेशु दरीदृष्यन्ते। यथा–

1. राष्ट्रं प्रवर्धतु विभो षान्तिर्भवतु नित्यषः।[35]
2. यो राश्टम् अनुगृहणाति स राज्यं परिरक्षति।[36]
3. सर्वे भद्राणि पष्यन्तु मा कष्चिद् दुःखभाग् भवेत्।[37]
4. धन्यास्ते ये न राश्ट्रभङ्गम् कुलक्षयम्।[38]

निश्कर्शरूपेण महर्शिवेदव्यासेन राश्ट्रस्य गौरवम् ओजस्विन्यां वाण्यां व्यक्तीकृतम्। अतः वर्तमानसमये व्याप्ताम् अराजकतां दृश्ट्वा स्वप्राचीनगौरवस्य स्मरणम् आवष्यकम्। यदि पुराणेशु वर्णितं राश्ट्रगौरवं पठित्वा अस्माकं ह्रदये स्वराश्ट्रं प्रति लेषमात्रमपि चिन्तनं भवेत् तर्हि पुराणसाहित्यस्य महत्त्वं निर्विवादितम् अस्ति। वर्तमानसमये अस्माकं लोकतंत्रे व्यापतं स्वार्थतंत्रं दृश्ट्वा मनसि अतीव क्षोभो जायते। अतः स्वराश्ट्रगौरवं स्वाभिमानं च जागरयितुं पुराणसाहित्यस्य अध्ययनस्य महती आवष्यकता वर्तते।

## सन्दर्थ ग्रन्थ


1. 'सार्वधातुभ्यः राश्ट्रन्' सिद्धान्तकौमुदी, उणादिप्रकरणं, 4/158
2. 'जनपदे गौडराश्ट्रमनुत्तमम्, वाचस्पत्यम्, भागशश्ठः।
3. षब्दकल्पद्रुमः, चतुर्थकाण्डम्।
4. संस्कृत साहित्य में राश्ट्रीयभावना, डॉ. हरिनारायण दीक्षित, पृ. 04
5. हिन्दु संस्कृति और राश्ट्रियता, कल्याण, हिन्दु संस्कृति अंक, पृ. 154
6. ब्रह्मपुराण 19/1
7. ब्रह्मपुराणम् 27/65–66
8. पद्मपुराणम् स्वर्गखण्डम्, अध्यायः 6–9
9. विश्णुपुराणम् 2/3/1–2
10. षिवमहापुराणम् 5/18/1–21
11. श्रीमद्भागवतमहापुराणम् 5/19/21
12. श्रीमद्भागवतमहापुराणम् 5/19/9
13. यजुर्वेदः 9/23
14. ऋग्वेदः 10/125/3
15. अथर्ववेदः 8/8/9
16. अथर्ववेदः 19/2/14
17. यजुर्वेदः 22/22
18. यजुर्वेदः 10/14
19. निबन्धषतकम् – डॉ. कपिलदेव द्विवेदी, पृ. 237
20. अथर्ववेद 12/1/12
21. मार्कण्डेय 57/63–64
22. षिवपुराणे 3 सं. 18/20
23. ब्रह्मपुराणे 19/27
24. ब्रह्मपुराणे 27/2
25. ब्रह्मपुराणे 27/66
26. ब्रह्मपुराणे 27/72
27. ब्रह्मपुराणे 27/78
28. ब्रह्मपुराणे 27/79
29. बृहन्नारदीयपुराणे 3/52
30. ब्रह्मपुराणे 245/30
31. मार्कण्डेयपुराणे 24/29
32. मार्कण्डेयपुराणे 115/37
33. अग्निपुराणे 223/7
34. अग्निपुराणे 225/34
35. वराहपुराणे 192/10
36. मत्स्यपुराणे 219/42
37. भविश्यपुराणे 3/2/35/14
38. गरूड़पुराणे 115/3